# ज्योतिषशास्त्रे विवाहचिन्तनम्

**डा.हरिनारायणधर द्विवेदी**
सहाचार्यः/संयोजकः
ज्योतिषशास्त्रविद्याशाखा
केन्द्रीय-संस्कृत-विश्वविद्यालयः
लखनऊपरिसरः (उ.प्र.)

भारतीय संस्कृति वैदिक संस्कृति की देन है। वैदिक संस्कृति महर्षियों की अनुपम निधि है। जिसे भारत वर्ष ने आज भी संजोकर रखा है। इस संस्कृति में संस्कारों की मुख्यता आज भी पूर्णतः वैज्ञानिकता से समृद्ध है। संस्कारों में सोलह संस्कार प्रसिद्ध है। सोलह संस्कारों में विवाह संस्कार गृहस्थाश्रमी के लिए महत्वपूर्ण है। संस्कारों के संपादन में मुहूर्त्त की महत्ता आचार्यों ने वर्णित की है। प्रस्तुत प्रबन्ध में विवाह संस्कार हेतु ज्योतिष शास्त्र के अवदान की चर्चा प्रस्तुत की गई है।

**अनाश्रमी न तिष्ठेत् क्षणमेकमपि द्विजः।**

**आश्रमादाश्रमं गच्छेदेषः धर्मः सनातनः।।**

आश्रमचतुष्टयसिद्धिः संस्कारैः विना न सिद्धा। कालशास्त्रे संस्काराणां विशदावदानम् अवाप्यते। गृहस्थाश्रमे च प्रवेशाय विविधेषु संस्कारभदेषु विवाहसंस्कारः अस्ति अन्यतमः। तत्र विवाहशब्देन अष्टविधविवाहप्रभेदवर्णनमपि प्राप्यते। किञ्च अग्निहोत्रादीनां नित्यानां कर्मणां करणे पत्नीं विना नाधिकार इति स्मृतौ स्मरणात्। **नापुत्रस्य लोकोस्ति** इति श्रुत्या पुत्राभावे परलोके दुर्गतिबोधनाच्च। विवाहसंस्काराय च शुभलग्नादिमुहूर्त्तानां मुख्यता प्रतिपादिता च मुहूर्त्तचिन्तामणिकृता यथा-

**भार्या त्रिवर्गकरणं शुभशीलयुक्ता शीलं शुभं भवति लग्नवशेन तस्याः।**

**तस्माद्विवाहसमयः परिचिन्त्यते हि तन्निघ्नतामुपगताः सुचशीलधर्माः।।** (1)

लोके कदाचित् दृश्यते यत् केषाञ्चित जनानां विवाहसंस्कारः इषित्वापि न भवति। परञ्च एतादृशानामपि ज्ञानं समाधानञ्च सम्भवति कालशास्त्रेण। न केवलं समाधानमपितु विवाहसंस्कारसमयोपि ज्ञातुं शक्यते। किञ्च कीदृशश्च वरः कन्यायै लाभप्रदः, कीदृशी च कन्या वराय लाभप्रदा। अपि च वैधव्यता,कुलटा, विवाहभङ्गता, बालविधवा, मृतवत्सादियोगज्ञानं शक्यते। विवाहे गुरुशुद्धिपूर्वकं विवाहाय मासशुभता विचारिता तद्यथा।

**मिथुनकुम्भमृगालिवृषाजगे मिथुनगेपि रवौ त्रिलवे शुचेः।**

**अलिमृगाजगते करपीडनं भवति कार्तिकपौषमधुष्वपि।।**(2)

विवाहाय ज्येष्ठमासे विशेषनियमाश्च सन्तीह शास्त्रे प्रसिद्धाः। सुतपरिणयात् षण्मासान्तः सुताकरपीडनं न कुर्यात्। तद्वत् निजकुले मुण्डनमपि न कुर्यात्। किञ्च सहोदरयोः भ्रात्रोः सहोदरकन्यके न देये। पुनश्च अब्दार्धे सहजसुतोद्वावः न कार्यः। शुभे कार्ये पितृक्रिया न कर्तव्या। मेलापके षट्त्रिंशत् गुणाः सन्ति प्रसिद्धाः। एते अष्टकूटानाम् अवयवैः निर्धारिताः। ते च यथा-

**वर्णो वश्यं तथा तारा योनिश्च ग्रहमैत्रकम्।**

**गणमैत्रं भकूटञ्च नाडी चैते गुणाधिकाः।।**(3)

कानिचन लग्नानि पङ्ग्वादिसंज्ञावशात् अशुभानि भवन्ति। तद्यथा-

**घस्रे तुलाली बधिरौ मृगाश्वौ रोत्रौ च सिंहाजवृषा दिवान्धाः।**

**कन्यानृयुक्कर्कटका निशान्धा दिने घटोन्त्यो निशि पङ्गुसंज्ञः।।**

**दारिद्र्य बधिरतनौ दिवान्धलग्ने वैधव्यं शिशुमरणं निशान्धलग्ने।**

**पङ्ग्वन्धे निखिलधनानि नाशमीयुः सर्वत्राधिपगुरुदृष्टिभिर्न दोषः।।**(4)

अष्टकूटानां निर्णयः वरकन्ययोः जन्मनक्षत्रवशात् भवति। तत्रादौ वर्णकूटविचारः प्रस्तूयते। तत्रादौ वर्णविचारः-

**द्विजा झषालिकर्कटास्ततो नृपा विशोङ्घ्रिजाः।**

**वरस्य वर्णतोधिका वधूर्न शस्यते बुधैः।।**(5)

अर्थात् झषालिकर्कटाः द्विजाः सन्ति। ततः विशः ततश्च शूद्राः भवन्ति। बुधैः वरस्य वर्णतः अधिका वधूः न शक्यते। किञ्च वश्यविचारे सिंहराशिं हित्वा सर्वे नरराशिवश्याः तथा एषां जलजाः राशयः भक्ष्याः भवन्ति।अलिं विना सर्वे सिंहस्य वशे सन्ति। अतः अन्यत् नराणां व्यवहारतः ज्ञेयम्। उक्तञ्च-

**हित्वा मृगेन्द्रं नरराशिवश्याः सर्वे तथैषां जलजास्तु भक्ष्याः।**

**सर्वेपि सिंहस्य वशे विनालिं ज्ञेयं नराणां व्यवहारतोन्यत्।।**(6)

अपि च ततः ताराविचारोपि प्रस्तूयते। कन्यर्क्षात् वरनक्षत्रं यावत् गणयेत्। वरनक्षत्रात् अपि कन्याभं यावत् गणयेत्। नवहृच्छेषे त्रीष्वद्रिभं अशुभं स्मृतम्।

**कन्यर्क्षाद्वरभं यावत् कन्याभं वरभादपि।**

**गणयेन्नवहृच्छेषे त्रीष्वद्रिभमसत्स्मृतम्।।**(7)

एवञ्च योनिविचारो यथा-

**अश्विन्यम्बुपयोर्हयो निगदितः स्वात्यर्कयोः कासरः**

**सिंहो वस्वजपाद्भयोः समुदितो याम्यान्त्योः कुञ्जरः।**

**मेषो देवपुरोहितानलभयोः कर्णाम्बुनोर्वानरः**

**स्याद् वैश्वाभिजितोस्तथैव नकुलश्चान्द्राब्जयोन्योरहिः।।**

**ज्येष्ठामैत्रभयोः कुरङ्ग उदितो मूलार्द्रयोः श्वा तथा**

**मार्जारोदितिसार्पयोरथ मघायोन्योस्तथैवोन्दुरुः।**

**वयाघ्रो द्वीशभचित्रयोरपि च गौरर्यम्णबुध्न्यर्क्षयो**

**र्योनिः पादगयोः परस्परमहावैरं भयोन्योस्त्यजेत्।।**(8)

ग्रहमैत्रीविचारस्तु सुप्रसिद्ध एव। एवञ्च मघाश्लेषा-धनिष्ठा-ज्येष्ठा-मूला-शतभिषा-कृत्तिका-चित्रा-विशाखाः राक्षसगणसंज्ञकाः। पूर्वात्रय-उत्तरात्रय-रोहिणी-भरणी-आर्द्राः मनुष्यगणसंज्ञकाः। अनुराधा-पुनर्वसु-मृगशिरा-श्रवण-स्वाती-लघुसंज्ञकाः देवगणाः। निजनिजगणमध्ये अत्युत्तमा प्रीतिः भवति। देवमनुजयोः सा मध्यमा सम्प्रदिष्टा। असुरमनुजयोः चेत् स्यात् तदा मृत्युः एव प्रदिष्टः। राक्षसदेवयोः नितान्तं वैरता भवति। तथा च राशिकूटविचारे षडष्टके मृत्युः, नवात्मजे अपत्यहानिः स्यात्। द्विर्द्वादशे द्वयोः कन्यावरयोः निर्धनत्वं स्यात्। अन्यत् सौख्यकृत् स्यात्। अस्य दुष्टभकूटस्य परिहारः यथाह-

**प्रोक्ते दुष्टभकूटके परिणयस्त्वेकाधिपत्ये शुभो**

**थो राशीश्वरसौहृदेपि गदितो नाड्यृक्षशुद्धिर्यदि।**

**अन्यर्क्षेशपयोर्बलित्वसखिते नाड्यृक्षशुद्धौ तथा**

**ताराशुद्धिवशेन राशिवशताभावे निरुक्तो बुधैः।।**(9)

ज्येष्ठारौद्रार्यमाम्भः पतिभयुगयुगं दास्रभं च एकनाडी भवति। पुष्पेन्दुत्वाष्ट्रमित्रान्तकवसुजलभं योनिबुध्न्ये च मध्या नाडी भवति। वाय्वग्निव्यालविश्वोडुयुगयुगमथो पौष्णभं च अपरा नाडी

स्यात्। एकनाड्यां दम्पत्योः परिणयनं असत् स्यात्। मध्यनाड्यां हि निश्चयेन मृत्युः स्यात्। अस्य परिहारश्चेत्थं प्राप्यते-

**राश्यैक्ये चिद्भिन्नमृक्षं द्वयोः स्यान्नक्षत्रैक्ये राशियुग्मं तथैव।**
**नाडीदोषो नो गणानां च दोषो नक्षत्रैक्ये पादभेदे शुभं स्यात्।।**[10]

इत्थं कालशास्त्रस्य योगदानं प्राप्यते भारतीयसंस्कृतौ।

## सन्दर्भसंकेताः-

1. मुहूर्त्तचिन्तामणिः (6-1)
2. तत्रैव (6-13)
3. तत्रैव (6-21)
4. तत्रैव (6-81/83)
5. तत्रैव (6-22)
6. तत्रैव (6-23)
7. तत्रैव (6-24)
8. तत्रैव (6-25/26)
9. तत्रैव (6-32)
10. तत्रैव (6-36)

**सन्दर्भग्रन्थाः-**

1. मुहूर्त्तचिन्तामणिः,हिन्दीव्याख्याकार,श्रीविन्ध्येश्वरप्रसादद्विवेदी,चौखम्बा सुरभारती प्रकाशन,वाराणसी-221001, दूरभाष-0542-2335263